कं.नं. २१

~~~~ याज्ञिक

रामेश्वरभट्ट — प्रयोगरत्न

पूर्ण

पुत्र
नारायणभट्ट

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

३१५
~~~~

(1)

॥ अथपुण्याहवाचनप्रारंभः ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint Project of the

पु०

श्रीगणेशायनमः ।। श्रीरामंसपरिवारं गणेशंचसरस्वतीं ।। आश्वलायनंचतच्छिष्यान्प्रणम्य
।।१।। पितरंगुरुं ।। १ ।। भट्टरामेश्वरसुनोःसद्भट्टनारायणस्य धीः ।। प्रयोगरत्नंकुरुते कौस्यां शिष्टेष्ट
सिद्धये ।। २ ।। ग्रंथेस्मिन्गुणगणवत्त्वमुच्यतेचेत्स्वग्रंथेगुणमणवंतमाहको ना ।। तत्संतःशिर
(2) सिकृतांजलिस्तयाचेशेषंग्रंथसत्प्रसादहेतोर्व्यतनमयायत्नः ।। ३ ।। नमामिपार्वतीसूनुंप्रक्रानां
सिद्धिदायकं ।। क्रियतेल्पप्रकारायस्मान्नुष्ठानपद्धतिः ।। ४ ।। दीक्षितानंतविज्ञानविश्वना
थस्यसूनुना ।। प्रयोगरत्नेनेसम्यक्संविस्तारपूर्वकं ।। ५ ।। आश्वलायनशास्त्रेस्मिन्संतिपद्ध
तयःशतं ।। विनापुस्तकमार्गेणाकर्मकर्तुंनशक्यते ।। ६ ।। तदर्थंक्रियतेयत्नःपाठबोधहितायच ।।
सुखप्रयोगायसिध्यर्थंवैदिकानांतदुच्यते ।। ७ ।। पंचविंशतिसंस्कारैःसंस्कृतायेद्विजाःयतेः ।। ते
पवित्राश्चयोग्याःस्युःश्राद्धादिषुसुयंत्रिताः ।। ८ ।। गर्भाधानंपुंसवनंसीमंतोबलिरेवच ।। बलिर्वि ।।१।।
ष्णुबलिःजातकर्मनामकर्मनिष्क्रमोन्नाशनंपरे ।। ९ ।। चौलकर्मोपनयनंव्रतानांचतुष्ट

(2A)

यं॥स्थानौद्वौहोचाग्रयणमष्टकाचयथातथं॥१०॥श्रावण्यामाश्वयुज्यांचमार्गशीर्ष्यांचपार्व
णं॥उत्सर्गश्चाप्युपाकर्ममहायज्ञाश्चनित्यशः॥११॥संस्कारानियताह्येतेब्राह्मणस्यविशेषतइति॥
॥श्री॥अथस्वस्तिवाचनं॥तत्रकर्तव्यंतदुच्यते॥व्यासः॥संपूज्यगंधमाल्याद्यैर्ब्राह्मणान्स्व
स्तिवाचयेत्॥धर्मकर्मणिमांगल्येसंग्रामेद्भुतदर्शने॥गृह्यपरिशिष्टे॥अथस्वस्तिवाचनमृद्धि
पूर्तेऽद्विविवाहांताअपत्यसंस्काराःप्रतिशेषाध्यापनेयंतत्कर्मणश्चाद्यंतयोःकार्यादिति॥आश्व
लायनस्मृतिः॥वैदिकेतांत्रिकंचादौतत्रःपुण्याहमुच्यते॥शौनकः॥पुण्याहवाचनविधिंव
क्ष्यामोथयथाविधि॥प्रयोगकर्मणामादावंतेचास्यासिद्धये॥तत्रप्रयोगांतर्गतमितिकेचित्॥
श्रीवृहद्वस्तुप्रयोगबहिर्भूतामिति॥आद्यकर्मपक्षेकर्मप्रयोगसंकल्पंकृत्वाकार्यं॥द्वितीयेतु
तत्कृत्वाकर्मसंकल्पः॥अथकिंचित्संक्षेपेणप्रयोगमात्रमुच्यते॥यजमानःकृताभ्यंगादिस्व
लंकृतोदर्भपाणिःशुचिर्भूत्वामंगलसंभारसंभृतस्वलंकृतेगृहेगोमयोपलिप्तभूमौसो

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

त्सरच्छेदे भद्रासने उदङ्मुख उपविश्य स्वदक्षिणपार्श्वे संस्कार्यो दङ्मुख उपविश्य रंगवल्लिकायुक्ते यो
२॥ भूतले प्रस्थपरिमितस्य शालेस्तदर्धन्यूनस्य वा धान्यस्योपरि दक्षिणोत्तरयोः सुवर्णरजतता
म्रमृन्मय कलशद्वयमव्रणं मनोरमं मलंहीनं शुद्धं पुष्पजलपूरितं सफलं पात्रं निधा
य सूत्रवेष्टितोत्तरकलशोपं चरत्नानि निक्षिप्य तंदुलपूरितं सफलं पात्रं निधाय त
(3) त्पश्चिमदेशोपशास्ता स्मृति वचनसमर्थो स्वादिवसे श्राद्धादिषु भुक्तवतो निषिद्धप्रति
ग्रहनिवृत्तान् शुचीन् सोत्तरीयान् सपवित्रपाणीत्यष्टभान् ब्राह्मणान् प्राङ्मुखानास
नासने उपविश्य गंधपुष्पादिभिः सम्यक्संपूज्य यथाचारं ॥ ॥ ॥ आचम्य प्राणानायम्य ॥ सुमु
खश्चैकदंतश्च कपिलो गजकर्णकः ॥ लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥ धूम्रके
तुर्गणाध्यक्षो भालचंद्रो गजाननः ॥ द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ विद्यारं ॥२॥
भे विवाहे च प्रवेशे निर्गमे तथा ॥ संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ शुक्लांबरध

(3A)

रंदेवंशशीवर्णंचतुर्भुजं॥प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये॥ ~~सर्वमंगलमांगल्ये~~
अभीप्सितार्थसिध्यर्थंपूजितोयःसुरासुरैः॥सर्वविघ्नहरेतस्मैश्रीगणाधिपतयेनमः॥
सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके॥शरण्येत्र्यंबकेगौरीनारायणिनमोस्तुते॥
सर्वदासर्वकार्येषुनास्तितेषाममंगलं॥येषांहृदिस्थोभगवान्मंगलायतनंहरिः॥तदे
वलग्नंसुदिनंतदेवताराबलंचंद्रबलंतदेव॥विद्याबलंदैवबलंतदेवलक्ष्मीपतेतेंघ्रियु
गंस्मरामि॥यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः॥तत्रश्रीर्विजयोभूतिर्ध्रुवा
नीतिर्मतिर्मम॥सर्वेष्वारंभकार्येषुत्रयस्त्रिभुवनेश्वराः॥देवादिशंतुनःसिद्धिंब्रह्मेशा
नजनार्दनाः॥लक्ष्मीनारायणाभ्यांनमः॥उमामहेश्वराभ्यांनमः॥शचीपुरंदराभ्यां
नमः॥मातृपितृभ्यांनमः॥इष्टदेवताभ्योनमः॥कुलदेवताभ्योनमः॥सर्वेभ्योब्राह्मणेभ्योनमः॥

Rajwade Sanshodhan Mandal, Dhule ... Yashwantrao Chavan ... Mumbai

विष्णुर्विष्णुर्विष्णुः।।श्रीमद्भगवतोमहापुरुषस्यश्रीविष्णोराज्ञयाप्रवर्त्तमानस्याद्य
२।। ब्रह्मणोद्वितीयेपरार्द्धेश्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरेकलियुगेप्रथमचरणे
भारतवर्षेभरतखंडेजंबुद्वीपेदंडकारण्येदेशेगोदावर्याउत्तरेतीरेशालिवाहन
शकेबौद्धावतारेरामक्षेत्रेऽस्मिन्वर्त्तमानेऽमुकनामसंवत्सरेऽमुकायनेऽमुकऋतौ
अमुकमासेमुकपक्षेऽमुकतिथौअमुकवासरेऽमुकदिवसनक्षत्रेमुकास्थिते
चंद्रेमुकस्थितेसूर्येमुकस्थितेदेवगुरौशेषेषुग्रहेषुयथाराशिस्थितेषुसत्सु
एवंगुणविशेषणविशिष्टायांपुण्यतिथावमुककर्मकरिष्ये।।तदंगगणपति
पूजनपूर्वकंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्ये।।तत्रादौनि
र्विघ्नतासिद्ध्यर्थंमहागणपतिपूजनमहंकरिष्ये।।ॐगणानांत्वागृत्समदो
गणाधिपतिर्जगतीगणपतिपूजनेविनियोगः।।ॐगणानांत्वागणपतिंहवा

(5A)

महेकविंकवीनामुपमश्रवस्तमं।।ज्येष्ठराजंब्रह्मणांब्रह्मणस्पत आनःशृण्वन्नूति
भिःसीदसादनं।।ऋद्धिबुद्धिसहितायगणपतयेनमः गणपतिमावाहयामि
।।गणपतयेनमः आसनंसमर्पयामि।।गण० पाद्यंस०।।गण० अर्घ्यं०।।गण०
आचमनीयंस०।गण० स्नानं०।।स्नानानंतरमाचमनीयं०।गण० वस्त्रंस०।गण०
यज्ञोपवीतंस०।गण० गंधं।।गण० अक्षतान्स०।गणप० दूर्वांकुरान्स० गणप० पुष्पं०
गण० धूपं० गण० दीपं० गण० शुद्धनैवेद्यं० गण० पूगीफलतांबूलंस०।।सतायाः पूजायाः
साद्गुण्यार्थंदक्षिणांस०।गणपत० नीराजनं०।।निषुसीदगणपतेगणेषुत्वामाहुर्वि
प्रतमंकवीनां।।नऋतेत्वत्क्रियतेकिंचनारेमहामर्कंमघवंचित्रमर्च।गण० मंत्र
पुष्पंस०।मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर।यत्पूजितंमयादेवपरिपू
र्णंतदस्तुमे।वक्रतुंडमहाकायसूर्यकोटिसमप्रभ।निर्विघ्नंकुरुमेदेवसर्वकार्येषुस

(5)

वेद॥ ॥ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां। पिपृतां नो भरीमभिः॥ ओषधयः संवदंते
सोमेन सह राज्ञा॥ यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि॥ आकुलशेषु धावतिप वित्रेप
॥ रि— षिच्यते॥ उक्थ्येषु यज्ञेषु वर्द्धते॥ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या॥
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया॥ गंधद्वारां दुराधर्षां नित्यपुष्टां क
रीषिणीं॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं॥ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पु
रा॥ मनै नु बभ्रूणामहं शतं धामानि सप्त च॥ कांडात्कांडात्प्ररोहंति परुषः परुषः परि॥ एवा नो दू
र्वे प्रतनु सहस्रेण शतेन च॥ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता॥ गोभाज इत्किलासथ यत्स
नवथ पूरुषं॥ स्योना पृथिवि भवा नृक्षरा निवेशनी॥ यच्छा नः शर्म सप्रथः॥ याः फलिनीर्या ॥४॥
अफला अपुष्पा याश्च पुष्पिणीः॥ बृहस्पतिप्रसूतास्ता नो मुंचंत्वंहसः॥ स हिरत्नानि दाशुषे सु
वाति सविता भगः॥ तं भागं चित्रमीमहे॥ हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः॥

Joint project of Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

(5A)

हिरण्ययास्त्परियोनेर्निषद्य हिरण्यदादद्त्यं नमस्मै ॥ युवासुवासाः परिवीत आगात्सउश्रेयान्भ
वतिजायमानः ॥ तंधीरासः कव यउन्नयंतिस्वाध्यो३ मनसादेवयंतः ॥ पूर्णादर्विपरापतसुपूर्णाउ
नरापत । वस्नेव विक्रीणावहाइषमूर्जंशतक्रतो ॥ तत्वायामिसुनःशेपोवरुणस्त्रिष्टुप्‌ व रुण
वाहने विनियोगः ॥ ॐ तत्वायामि ब्रह्मणावंदमानस्तदाशास्ते यजमानोहविर्भिः ॥ अहेलमा
नोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः ॥ उत्तरकलशे वरुणायनमः वरुणावाहयामि ॥ व
रुणाय० आसनं० वरुणाय० पाद्यं० वरुणा० अर्घ्यं० वरुणा० आचमनीयं० वरुणा० स्नानं० स्ना
नं नरमाचमनीयं० वरुणा० वस्त्रं० वरुणा० यज्ञोपवीतं० वरुणाय० गंधं० वरु० अक्षतान्० वरु
णा० पुष्पं० वरुणा० धूपं० वरुणा० दीपं० वरुणा० गुडनैवेद्यं० वरुणा० पूगीफलतांबूलं० वरुणा
य० दक्षिणां० वरुणा० नीराजनं० तत्वायामिब्रह्मणावंदमानः० वरुणा० मंत्रपुष्पं० ॥ पुण्याहवाचने ह २
चैव यः कुर्यात्कलशार्चनं ॥ दक्षिणस्थः स्थिरश्चैव उत्तरस्थश्चरस्तथा ॥ १ ॥ न चालयेद्दक्षिण

Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6)

स्योउत्तरस्यस्तुचालयेत्॥ अन्यथाधर्महानिस्यादेषधर्मसनातनः॥२॥ कलशस्यमुखेवि
५॥ ष्णुःकंठेरुद्रसमाश्रितः॥ मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः॥ कुक्षौतुसागराः
सप्तसप्तद्वीपावसुंधरा॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः॥ अंगैश्चसहिताः
सर्वेकलशंतुसमाश्रिताः॥ अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीतथा॥ आयांतुमम
शांत्यर्थंदुरितक्षयकारकाः॥ मातृदेवोभव। पितृदेवोभव। आचार्यदेवोभव। अतिथिदेवोभ
व॥ ततः। आशिषःप्रार्थयेत्सत्याएताआशिषःसंतु। अवनिकृतजानुमंडलंकमलमुकु
लसदृशमंजलिंशिरस्याधायदक्षिणेनपाणिनासुवर्णकलशंधारयित्वादीर्घानागा
नद्योगिरयस्त्रीणिविष्णुपदानिचतेनआयुःप्रमाणेनपुण्याहंदीर्घमायुरस्तु॥ ॥ ॥५॥
शिवाआपःसंत्वितिभवंतोब्रुवंतुशिवाआपःसंतु॥ सौमनस्यमस्तु। अक्षतंचारिष्टंचास्तु॥
गंधाःपांतु॥ सुमंगल्यंचास्तु॥ अक्षताःपांतु। आयुष्यमस्तु। पुष्पाणिपांतुसौश्रियमस्तु॥

(6A)

तां कृत्वा निपातैश्वर्यमस्तु॥ दक्षिणाः पांतु बहुदेयं चास्तु॥ दीर्घमायुः शांतिः पुष्टिस्तुष्टिः श्रीर्यशो वि
द्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु॥ यं कृत्वा सर्ववेदयज्ञः क्रियाकरणकर्मारंभाः शुभाः शो
भनाः प्रवर्त्तते तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बहुऋषिमतं संविज्ञातं भवद्भि
रनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये वाच्यतां॥ ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्ष
भिर्यजत्राः॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥ द्रविणोदा द्रविणसस्तुरस्य
द्रविणोदाः सनरस्य प्रयंसत्॥ द्रविणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमायुः॥ स
विता पश्चाता[illegible] सविता पुरस्तात्सवितो[illegible]त्तरात्तात्सविताधरात्तात्॥ सविता नः सुवतु
सर्वतातिं सविता नो रासतां दीर्घमायुः॥ नवो नवो भवति जायमानोह्नां केतुरुषसामेत्यग्रं॥ भागं
देवेभ्यो विदधात्यायन्प्र चंद्रमास्तिरते दीर्घमायुः॥ उच्चा दिवि दक्षिणावंतो अस्थुर्ये अश्व
दाः सह ते सूर्येण॥ हिरण्यदा अमृतत्वं भजंते वासोदाः सोम प्रतिरंत आयुः॥ आप उंदंतु जी

(७)

वसेदीर्घायुत्वायवर्चसे।।यस्त्वाहृदाकीरिणामन्यमानोऽमर्त्यंमर्त्यो जोहवीमि।।जातवेदोयशो
६॥ अस्मासुधेहिप्रजाभिरग्नेअमृतत्वमश्यां।।यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृणवस्योनं॥
अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिंनशतेस्वस्ति।।सत्वासिंचामियजुषाप्रजामायुर्धनंच॥
य४ व्रतनियमतपस्वाध्यायक्रतुदमदानविशिष्टानांब्राह्मणानां॥ मनःसमाधीयतांसमाहित
मनसःस्म।।प्रसीदंतुभवंतः।प्रसन्नाःस्मः।।शांतिरस्तु।पुष्टिरस्तु।तुष्टिरस्तु।ऋद्धिरस्तु।वृद्धि
रस्तु।अविघ्नमस्तु।आयुष्यमस्तु।आरोग्यमस्तु।शिवंकर्मास्तु।कर्मसमृद्धिरस्तु।धर्मसमृ
द्धिरस्तु।वेदसमृद्धिरस्तु।।शास्त्रसमृद्धिरस्तु।पुत्रसमृद्धिरस्तु।धनधान्यसमृद्धिरस्तु।।इष्टसंप
दस्तु।अरिष्टनिरसनमस्तु।यत्पापंतत्प्रतिहतमस्तु।यच्छ्रेयस्तदस्तु।उत्तरेकर्मण्यवि
घ्नमस्तु।उत्तरोत्तरमहरहरभिवृद्धिरस्तु।उत्तरोत्तराःक्रियाःशुभाःशोभनाःसंपद्यंतां॥ ॥ ६
तिथिकरणमुहूर्तनक्षत्रसंपदस्तु॥ तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयंतां॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7A)

निथिकरपासुहृत्तेन स्तेनेसम्महसदेवते प्रीयेतां॥दुर्गापांचालौ प्रीयेतां॥अग्निपुरोगा विश्वेदेवाः
प्रीयंतां॥ब्रह्मपुरोगाः सर्वेवेदाः प्रीयंतां॥विष्णुपुरोगाः सर्वेदेवाः प्रीयंतां॥इंद्रपुरोगा मरुद्ग
णाः प्रीयंतां॥वसिष्ठपुरोगा ऋषिगणाः प्रीयंतां॥अरुंधतीपुरोगा एकपत्न्यः प्रीयंतां॥माहेश्व
रीपुरोगा उमामातरः प्रीयंतां॥ऋषयः छंदांस्याचार्या वेदा यज्ञाश्च प्रीयंतां॥ब्रह्म च ब्राह्मणाश्च
प्रीयंतां॥श्रीसरस्वत्यौ प्रीयेतां॥श्रद्धामेधे प्रीयेतां॥भगवती कात्यायनी प्रीयतां॥भगवती मा
हेश्वरी प्रीयतां॥भगवती पुष्टिकरी प्रीयतां॥भगवती तुष्टिकरी प्रीयतां॥भगवती ऋद्धिकरी प्री
यतां॥भगवती वृद्धिकरी प्रीयतां॥भगवंतौ विघ्नविनायकौ प्रीयेतां॥भगवान्स्वामी महासेनः
सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्रीयतां॥सर्वाः कुलदेवताः प्रीयंतां॥सर्वा ग्रा
मदेवताः प्रीयंतां॥हरिहरहिरण्यगर्भाः प्रीयंतां॥हता ब्रह्मद्विषः॥हताः परिपंथिनः॥हता अस्य
कर्मणो विघ्नकर्तारः शत्रवः पराभवं यांतु॥शाम्यंतु घोराणि॥शाम्यंतु पापानि॥शाम्यंत्वीतयः

(8)

शुभानि वर्द्धन्तां ॥ शिवा आपः संतु ॥ शिवा ऋतवः संतु ॥ शिवा अग्नयः संतु ॥ शिवा आहुतयः संतु ॥ शिवा
ओषधयः संतु ॥ शिवा वनस्पतयः संतु ॥ शिवा अतिथयः संतु ॥ अहोरात्रे शिवे स्यातां ॥ निकामे नि
कामे नः पर्जन्यो वर्षतु ॥ फलवत्यो न ओषधयः पच्यंतां ॥ योगक्षेमो नः कल्पतां ॥ शुक्रांगारक
बुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंतां ॥ भगवान्नारायणः
प्रीयतां ॥ भगवान्पर्जन्यः प्रीयतां ॥ भगवान्स्वामी महासेनः प्रीयतां ॥ पुण्याहकालं वाचयिष्ये
वाच्यतां ॥ ॥ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि ॥ वृषेव वाजी शिशुमती
रपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने पुण्यमा वद ॥ याऽन्युषा यज्ञ तिष्ठत्त्रैर्वै या
ऽस्या पुण्ये व लक्ष्मीः पुण्यामेव तं लक्ष्मीं संस्रावयति पुण्यां लक्ष्मीं संस्कुरुते ॥ यत्पुण्यं नक्षत्रं ॥८
तद्बट्कुर्वीतोपव्युषं ॥ यदा वै सूर्य उदेति ॥ अथ नक्षत्रं नैति ॥ यावति तत्र सूर्यो गच्छेत् ॥ यत्र ज
घन्यं पश्येत् ॥ तावति कुर्वीत यत्कारी स्यात् ॥ पुण्याह एव कुरुते ॥ तानि वा एतानि यमनक्षत्रा

(8A)

णि॥ यान्येवदेवनक्षत्राणि। तेषुकुर्वीतयत्कारीस्यात्॥ पुण्याहएवकुरुते॥ महांसकुटुंबिनेमहाजनो
नेमस्कुर्वाणायाशीर्वचनमपेक्षमाणाय अमुककर्मणः पुण्याहंभवंतोब्रुवंतु॥ इतित्रिर्वदेत्॥ मं
द्रमध्यामोच्चैर्निःस्वनेन॥ तथैव ॐपुण्याहमितित्रिर्विप्राः॥ ॐस्वस्तयेवायुमुपब्रवामहैसोमंस्व
स्तिभुवनस्ययस्पतिः॥ बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवंतुनः॥ आदित्य
उदयनीयःपथ्ययेवेतःस्वस्त्यात्रयंतिपथ्यांस्वस्तिमभ्युद्यंतिस्वस्त्य वेतःप्रयंतिस्वस्त्युद्य
तिस्वस्त्युद्यंति॥ स्वस्तिनइंद्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः॥ स्वस्तिनस्तार्क्ष्योअ
रिष्टनेमिःस्वस्तिनोबृहस्पतिर्ददातु॥ अष्टौदेवावसवःसोम्यासः। चतस्रोदेवीरजराश्रविष्ठाः॥
तेयज्ञंपांतुरजसःपुरस्तात्। संवत्सरीणममृतंस्वस्ति॥ यज्ञमित्यादिकर्मणस्त्वंतंपूर्वव
त्॥ स्वस्तिंभवंतोब्रुवंत्विति त्रिः॥ ओंआयुष्मतेस्वस्ति॥ इतिप्रतिवचनंत्रिः॥ ॐ ऋध्यास
स्तोमंसनुयामवाजमानोमंत्रंसरथेहोपयातं॥ यशोनपक्वंमधुगोष्वंतराभृतांशोअश्वि

Joint project of the Rajwade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(९)

नोः कामसम्राः॥ सर्वामृद्धिमृध्नुयामिति॥ संवैतेजसेव पुरस्तात्सर्यत्सव छंदोभिर्मध्यतोऽक्षरे रूपरिष्टा
॥५॥ द्गायत्र्यासर्वलोहाद्दशाहं परिसृत्य सर्वामृद्धिमार्भ्रोत् सर्वामृद्धिमृध्नोति य एवं वेद॥ ऋध्यास्म
हव्यैर्नमसोपसद्य॥ मित्रं देवं मित्रधेयं नो अस्तु॥ अनुराधान्हविषा वर्धयंतः॥ शतं जीवेम शर
दः सवीराः॥ त्रीणि त्रीणि वै देवानामृद्धानि त्रीणि छंदांसि त्रीणि सवनानि त्रय इमे लोकाः॥ ऋ
ध्यामेव तद्वीर्य एषु लोकेषु प्रतितिष्ठति॥ महा[illegible]मि साद्य पूर्ववत्। अमुकमेणः ऋद्धिं भवंतो ब्रुवं
त्विति त्रिः। ऋध्यताम् ऋद्धिः समृद्धिः इति त्रिः॥ ॐ श्रियै जातः श्रिय आनिरियाय॥ श्रियं
वयो जरितृभ्यो दधाति॥ श्रियं वसाना अमृतत्वमायन् भवंति सत्या समिथा मितद्रौ। त
श्रिय एवैनं तच्छ्रियामादधाति संततमृचा वषट्कृत्यं संतत्यै संधीयते प्रजया पशु ॥५॥
भिर्य एवं वेद॥ ॥ यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत्। अमुं च लोकमिदमू च सर्वं। तन्नो न
क्षत्रमभिजिद्विजित्य। श्रियं दधात्वहृणीयमानं। अहे बुध्निय मंत्रं मे गोपाय। यमृष
यः त्रयीविदा विदुः। ऋचः सामानि यजूंषि। सा हि श्रीरमृता सतां। मह्यमिस्या

(9A) मरुतः परिवेष्टारो

दिश्रिरस्त्विति भवंतो ब्रुवंत्विति त्रिः। अस्तु श्रीरिति त्रिः। मंगलानि भवंतु। वर्षशतं पूर्णम
स्तु। शिवं कर्मास्तु। गोत्राभिवृद्धिरस्तु। प्रजापतिः प्रीयतां॥ शुक्रेभिरंगैरज आततन्वान्क्र
तुं पुनानः कविभिः पवित्रैः। शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः। त
दप्येषश्लोको भिगीतो मरुतस्यावसंनगृहे आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद
इति। ततउत्तरकलशं दक्षिणहस्ते दक्षिणे कले वामहस्ते गृहीत्वा ताभ्यां धाराद्वयं संत शं
तं पात्रे निषिंचेद् एभिर्मंत्रैः। ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवानः। दे?
यत्त्वेमहे प्रतितन्नो जुषस्व शंनो भव द्विपदे शं चतुष्पदे। वास्तोष्पते प्रतरणो न एधि गयस्फा
नो गोभिरश्वेभिरिंदो। अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व। वास्तोष्पते
श ग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या। पाहि क्षेम उत योगे वरं नो यूयं पात स्व
स्तिभिः सदा नः। अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव एधि नः॥ शि
वं शिवं शिवं। अभिषेके पत्नी वामतः। समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यंत्यनिविश ले
मानाः। इंद्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवंतु। या आपो दिव्या उत वा स्रवं

म

(10)

तिखनित्रिमा उतवायाःस्वयंजाः॥समुद्रार्थायाःशुचयःपावकास्ताआपोदेवीरिहमामवंतु॥यासांरा
२॥ जावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां॥मधुश्चुतःशुचयोयाःपावकास्ताआपोदेवी
रिहमामवंतु॥यासुराजावरुणोयासुसोमोविश्वेदेवायासूर्जंमदंति॥वैश्वानरोयास्वग्निःप्र
विष्टस्ताआपोदेवीरिहमामवंतु॥त्रायंतामिहदेवास्त्रायंतांमरुतांगणाः॥त्रायंतांविश्वाभूतानियथा
यमरपअसत्॥आपइद्वाउभेषजीरापोअमीवचातनीः॥आपःसर्वस्यभेषजीस्तास्तेकृण्वं
तुभेषजं॥हस्ताभ्यांदशशाखाभ्यांजिह्वावाचःपुरोगवी॥अनामयित्नुभ्यांत्वाताभ्यांत्वोपस्पृ
शामसि॥इमाआपःशिवतमाइमाःसर्वस्यभेषजीः॥इमाराष्ट्रस्यवर्द्धनीरिमाराष्ट्रभृतोमृताः॥
याभिरिंद्रम[illegible]भ्यषिंचत्प्रजापतिःसो[illegible]मे[illegible]राजानं[illegible]वरुणोयमंमनुं॥ताभिरद्भिरभि म
षिंचामित्वामहंराष्ट्राणांत्वमधिराजोभवेह॥महांतंत्वामहीनांसंम्राजंचर्षणीनां॥देवीजनि ॥९
त्र्यजीजनद्भद्राजनित्र्यजीजनत्‌देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम

(10 A)

ग्नेस्तेजसासूर्यस्यवर्चसेंद्रस्येंद्रियेणाभिषिंचामि॥बलायश्रियैयशसेन्नाद्याय॥भूर्भुवस्वः
अमृताभिषिक्तोस्तु॥ॐ इंद्रियंवाएतदस्मिंल्लोकेयद्दधियद्दध्नाभिषिंचतींद्रियमेवास्मिं
स्तद्दधातिरसोवाएषओषधिवनस्पतिषुयन्मधुयन्मध्वाभिषिंचतिरसमेवास्मिं
स्तद्दधातितेजोवाएतत्पशूनांयद्घृतंयद्घृतेनाभिषिंचतितेजएवास्मिंस्तद्दधात्यमृतंवा
एतदस्मिंल्लोकेयदापोयदद्भिरभिषिंचत्यमृतत्वमेवास्मिंस्तद्दधातिसोभिषिक्तोभिषेक्त्रे
ब्राह्मणायहिरण्यंदद्यात्सहस्रंदद्यात्क्षेत्रंचतुष्पाद्दद्यादथाप्याहुरसंख्यातमेवापरिमितं
दद्यादपरिमितोवैक्षत्रियोपरिमितस्यावरुद्ध्याइत्यथास्मैसुराकंसंहस्तआदधातिस्वादिष्ठया
मदिष्ठयापवस्वसोमधारया॥इंद्रायपातवेसुतइतितांपिबेद्यदत्रशिष्टंरसिनःसुतस्ययदिंद्रोअ
पिबच्छचीभिः॥इदंतदस्यमनसाशिवेनसोमंराजानमिहभक्षयामि॥अभित्वावृषभासु
तेसुतंसृजामिपीतये॥तृंपाव्यश्नुहीमदमितियोहवावसोमपीथःसुरायांप्रविष्टःसहैवतेनैंद्रेणम
हाभिषेकेणाभिषिक्तस्यक्षत्रियस्यभक्षितोभवतिनसुरातांपीत्वाभिमंत्रयेतापामसोमंशंनोभवतितद्यथावा

(11)

दः प्रियः पुत्रः पितरं प्रिया वा जाया पतिं सुखं शिवमुपस्पृशत्याविस्रंस एवं हैवैते नैंद्रेण महाभिषेके
१० णाभिषिक्तस्य क्षत्रियस्य सुरा वा सोमो वान्यद्वान्नाद्यं सुखं शिवमुपस्पृशत्याविस्रंसः ।। १ ।।
इत्यादि ब्राह्मणं ।। सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः । वासुदेवो जगंनाथस्तथा सं
कर्षणो विभुः ।। २ ।। प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते । आखंडलोग्निर्भगवान्यमो
वै निर्ऋतिस्तथा ।। ३ ।। वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः । ब्रह्मणा सहिताः सर्वे दि
क्पालाः पांतु ते सदा ।। ४ ।। कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा
वपुः शांतिः कांतिः स्तुष्टिश्च मातरः । एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः ।
आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः । ५ ।। ग्रहास्त्वामभिषिंचंतु राहुके ।।१०
तुश्च तर्पिताः । देवदानवगंधर्वा यक्षराक्षसपंनगाः । ६ ।। ऋषयो मानवो गावो देवमा
तर एव च ।। देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ।। ७ ।। अस्त्राणि सर्वशास्त्रा

Mandal, Dhule and

(11A)

समस्तसंपत्। इतिब्राह्मणान्प्रार्थयेत्॥ सत्यवसुसंज्ञका विश्वेदेवाभूर्भुवःस्वःस्था
नेक्षणंदत्वाप्सवद्भिः प्रसादः कर्त्तव्यः। मातृपितामहीप्रपितामह्यः नांदिमुखाभूर्भुवः
स्वःस्थानेक्षणं०॥ पितृपितामहप्रपितामहानांदीमुखाभूर्भुवःस्वःस्थानेक्षणं०॥ माता
महमातुःपितामहमातुःप्रपितामहाःसपत्नीकानांदीमुखाःभूर्भुवःस्वःस्थानेक्षणं०॥ नू
तनचतुरस्रंपाद्यार्थंमडलंकृत्वा॥ सत्यवसुसंज्ञका विश्वेदेवानांदीमुखाभूर्भु
वःस्वः इदंवःपाद्यंस्वाहानमः॥ इतियवोदकंविप्रद्वयपादेषु द्विर्वारंक्षिपेत्। ततःपूर्वव
त्स्वागतवचनादिभिरभ्यर्चनांतंकृत्वा॥ मातृपितामहीप्रपितामह्यः नांदीमुखाःभूर्भु
वःस्वः इदंवःपाद्यंस्वाहानमम। एवंपितृवर्गस्यमातामहवर्गस्यसपत्नीकस्यपाद्यंदत्वा
॥ द्वौद्वौविप्रौप्राङ्मुखउपवेश्य। उपक्रांतंनांदीश्राद्धंकर्मकरिष्ये॥ देवेहस्तोदकंद

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai ... Joint project

(12)

स्वारुज्जुरसैःकुद्दग्गैरासनंदक्षिणतोदत्वापोदत्वानांदीश्राद्धेदेवस्थानेक्रियतामितिकर्त्तावदे
४ त्॥विप्राःॐतथाप्राप्नुतांभवंतौ॥विप्राः॥प्राप्नुवः॥कर्त्तायवैरभ्यर्चयेत्॥अर्घ्यपात्राणिप्रा
क्संस्थानितत्रजलमापूर्य॥यवोसीतिमंत्रेणदेवपात्रेयवान्निक्षिप्य॥गंधपुष्पाणिक्षिप्त्वा॥वि
श्वेदेवासआगतश्रृणुतामइमंहवं॥एदंबर्हिर्निषीदत॥विश्वेदेवाःश्रृणुतेमंहवंमेयेअंतरिक्षेय
उपद्यविष्ठ॥येअग्निजिह्वाउतवायजत्राआसद्यास्मिन्बर्हिषिमादयध्वं॥इतिमंत्रद्वये
नमूर्द्धादिपादपर्यंतंयवैरभ्यर्चयेत्॥आगच्छंतुमहाभागाविश्वेदेवामहाबलाः॥येअत्रविहि
ताश्राद्धेसावधानाभवंतुते॥भवामः॥इतितेषांप्रार्थयेत्॥देवपात्रेसंपन्नेसुसंपन्नेस्वा
हार्घ्यास्तुस्वाहा॥इतिप्रतिवचनंदेयं॥सत्यवसुसंज्ञकाविश्वेदेवानांदीमुखाःभूर्भुवःस्वः १६
इदंवोअर्घ्यंस्वाहानमोनममेतिसकृदर्घ्यंदत्वा॥ततोगंधपुष्पधूपदीपाच्छादनानिदत्वा॥

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com